अभ्यास-प्रश्नपत्रम् - 2025

कक्षा - द्वादशी

संस्कृतम् (केन्द्रिकम्) (कोड-322)

समयः होरात्रयम् सम्पूर्णांकाः- 80

सामान्य निर्देशाः -

. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे पृष्ठानि मुद्रितानि सन्ति।

. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।

. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति-

खण्डः (क) अपिठत-अवबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मककार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्तव्याकरणम् - 20 अङ्काः

खण्डः (घ) I. पठित-अवबोधनम् - 25 अङ्काः

II. संस्कृत - साहित्येतिहास – परिचयः - 10 अङ्काः

. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांङ्काः अवश्यं लेखनीयाः।

. प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यम् एव लेखनीया ।

. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

क भागः

**अपठित अवबोधनम्**

**प्र.1 अधोलिखितं अपठित गद्यांशं पठित्वा प्रदत्त-प्रश्नान् संस्कृतेन उत्तरत- (10)**

**वर्तमानयुगं यन्त्राणां युगमस्ति। वैज्ञानिका: सञ्चार-साधनेष्वपि प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्।**

जड्गमवाणी ( मोबाइल फोन) तादृशम् एव लोकप्रियं यन्त्रम्। बाला: , वृद्धाः, पुरुषा: , महिला: , नागरिकाः , ग्रामीणा: वा सर्वषां पार्श्वे एतत् यन्त्रं प्राप्यते। यानानि आरूढ़ा:, कार्यालयेषु कार्यं कुर्वन्त:, मार्गेषु चलन्तः, सभागारेषु

प्रवचनं श्रृण्वन्तः जना: अस्याः ध्वनिं श्रुत्वा वार्तामग्ना: भवन्ति। शिशुः जड्गमवाण्या एव क्रीडति, जागर्ति स्वपिति च। अविवेकपूर्ण: अस्या: प्रयोग: कार्येष् व्यवधानं करोति। मार्गेषु दुर्धटना: भवन्ति। सत्यमस्ति यत् आविष्कार: कदापि हानिकार: न परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्ति: नश्यति। स्वास्थ्यस्य समयस्य च हानि: भवति। वस्तुतः वयं यन्त्रस्य अधीना:

न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एवं बुद्धिमन्त: ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2 x 1 = 2

(1) वर्तमानयुगं केषां युगम् अस्ति?

(2) शिशुः कया क्रीडति?

(3)दुष्प्रयोगेण कस्य शान्तिः नश्यति?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2 x 2 = 4

(1) के खलु बुद्धिमन्त:?

(2) आविष्कारस्य दुष्प्रयोगेण किं किं भवति?

(3) केषां पार्श्वे एतत् यन्त्रं प्राप्यते?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 1x1= 2

(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम् ) 1x3=3

(1) 'नवीनतमान् आविष्कारान्' अनयो: विशेषणपदं किम्?

(क) सन्देशप्रेषणे (ख)सुविधा (ग) आविष्कारान् (घ) 'नवीनतमान्

**(2) 'न्यूनतमा' इत्यस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत।**

(क) **अधिकतमा** (ख) **नवीनतमान्** (ग) **हानिकारः** (घ) **आविष्कारः**

**(3) 'शिशुः जङ्गमवाण्या एवं क्रीडति' अत्र कर्तृपदं किम्?**

(क) **जङ्गमवाण्या** (ख) **'शिशुः** (ग) **क्रीडति'** (घ) **एवं**

## खण्डः - ख

## रचनात्मककार्यम् - 15 अङ्काः

प्र. 2 भवान् प्रणवः। चेन्नईनगरे छात्रावासे स्थित्वा अध्ययनं करोति। छात्रावासे स्वदिनचर्यायाः वर्णनम् कुर्वन् स्वमातरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत। 10×½=5

(i).............

तिथिः.........

पूजनीये मातः

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु । भवत्याः पत्रम् प्राप्य मनसि (ii).............जातः यत् पितृमहोदयः इदानीम् (iii) ............. स्वस्थोऽस्ति।सः मम स्वास्थ्यस्य (iv)................च विषये चिंतितः आसीत्। परं चिन्तायाः न कोऽपि विषयः। अहम् प्रतिदिनं प्रातः चतुर्वादने(v)...........व्यायामं कृत्वा (vi).............पठामि। ततः स्नात्वा दुग्धादिकं च पीत्वा पादोनसप्त -वादने विद्यालयं गच्छामि।

द्विवादने (vii)............आगत्य भोजनं कृत्वा विश्रामं करोमि। सार्ध-चतुर्वादने उत्थाय गृहकार्यं करोमि । संस्कृतविषये अहम् (viii) ............. परिश्रमं करोमि । पितृमहाभागानाम् (ix)............प्रणामाः कथनीयाः।

भवत्याः प्रियः पुत्रः

(x)................

| |
|---|
| विद्यालयात्, सन्तोषः,अध्ययनस्य, घण्टाद्वयम्, विशेषतया चरणयोः, छात्रावासतः, उत्थाय, प्रणवः, पूर्णरूपेण |

3.(अ) अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत- 5



मञ्जूषा

| |
|---|
| पर्यावरणस्य रक्षा, पादपाः, शुद्ध-वायुः,जीवनम्, रोपणीयाः, भोजनम्, वृक्षाः |

अथवा

(आ) अधः प्रदत्तं विषयम् आधृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदम् लिखत- 5

विषयः- सत्सङ्गतिः

**4.(अ)मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत - ½x10=5**

पुरा गुजरातप्रदेशे एकस्मिन् ग्रामे एकं (i)---------गुरुकुलम् आसीत् । तत्र द्विशतं छात्रा: गुरुभ्यः अनेकान् विषयान् (ii)--------पठन्ति स्म । तेषां भोजनादिव्यवस्थाम् एका नगरस्थिता संस्था (iii)------- । एकदा संस्थाधिकारिणः छात्रेभ्यः एकं वैद्यं प्रेषितवन्तः । सः त्रीन् मासान् तत्र अवसत्। किन्तु--------(iv) रुग्णः तस्य समीपे चिकित्सायै न आगच्छत्।(v)------- प्रधानाचार्यम् अपृच्छत्-किम् अत्र कोऽपि रोगी न भवति? (vi)-----------विहस्य अवदत् वैद्यराज! अस्य एकम् रहस्यम् अस्ति। अत्र सर्वे तदा भोजनं (vii)------यदा ते तीव्रक्षुधाम् अनुभवन्ति। यदा तेषां भोजनेन तृप्तिः भवति, ततः पूर्वम् एव ते (viii)--------त्यजन्ति। एतत् एव एतेषां(ix) -------------रहस्यम्। भवान् जानाति एव यत् स्वस्थाः नराः औषधं न सेवन्ते। तद्वचनं श्रुत्वा वैद्य: हसित्वा अवदत्-अत्र(x)------- उपयोग: न अस्ति।अहं गच्छामि। नमस्कारः। यत्र रोगः तत्र वैद्य :।

| |
|---|
| गुरुकुलम् , अकरोत् , कोऽपि, स्वास्थ्यस्य, पठन्ति ,कुर्वन्ति, भोजनं, वैद्यराजः ,प्रधानाचार्यः , मम |

अथवा

(आ)**अधोलिखिते संवादे रिक्तस्थानानि पूरयत - 1x5=5**

**पिता-(दूरदर्शने स्त्रीं विमानचालकरूपेण दृष्ट्वा) अहो! कुत्र कुत्र न दृश्यते नारी|**

**पुत्री -अद्य नारी सर्वस्मिन् क्षेत्रे कार्यं कर्तुं समर्था |**

**पुत्रः -सत्यम् | हे पितः! किं प्राचीनकालेऽपि नारी सर्वं कर्तुं समर्था आसीत्?**

**माता - आम् | (i) -------------------------------------------------------- |**

**पुत्रः- किं प्राचीनकालेऽपि (ii).---------------------------------------**

**पिता - आम् प्राचीन कालेऽपि नार्यः शिक्षां प्राप्तुं समर्थाः आसन् |**

**पुत्री - परं कदा (iii) -------------------------------------------?**

**माता - मध्यकाले एव नारीणां शिक्षां प्रति जनैः विरोधः कृतः |**

**पुत्रः - आम् अस्माकं अध्यापिकया अपि पाठितं एतद् |**

**पिता - किं भवान् जानाति नारीणां (iv) ----------------------------------?**

**पुत्री - आम् | नारीणां पुनः उत्थानाय राजाराममोहनरायेण प्रयत्नः कृतः |**

**पुत्रः - किं (v) ----------------------------------------------------------------?**

**माता - आम् । अस्माकं समाजसुधारकैः स्त्रीशिक्षायै अनेकाः संस्थाः संस्थापिताः ।**

मञ्जूषा

| |
|---|
| **(i) पुनः उथानाय राजाराममोहनरायेण प्रयत्नः कृतः ?** |
| **(ii).नार्यः शिक्षां प्राप्तुं समर्थाः आसन् ?** |
| **(iii).अस्माकं समाजसुधारकैः स्त्रीशिक्षायै अनेकाः संस्थाः संस्थापिताः ?** |
| **(iv).प्राचीनकालेऽपि नारी सर्वं कर्तुं समर्था आसीत् ।** |
| **(v) नारीणां शिक्षां प्रति जनैः विरोधः कृतः ?** |

**खण्ड - ग**

**अनुप्रयुक्तव्याकरणम् 20**

**5.(अ)अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत- 4×1=4**

**(क) वेदम् अनूच्य <u>आचार्योऽन्तेवासिनम्</u> अनुशास्ति ।**

**(ख) <u>शैशवे + अभ्यस्त</u>विद्यानाम् ।**

**(ग) तस्य एव वचनात् <u>भवत् + अभिषेको</u> निवृत्तः ।**

**(घ) अथ क्षणाभ्यन्तरं पुनः स एव <u>पादध्वनिरश्रावि</u> इति।**

**अथवा**

**(आ) अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत-**

**(क) विनिर्मितम् + छादनम् अज्ञतायाः ।**

**(ख) पुरा धाराराज्ये सिन्धुल-सञ्ज्ञो राजा चिरं प्रजाः पर्यपालयत्**

**(ग) कोकिलानां मधुरवचांसि श्रुत्वा कस्य यूनः + हृदयम् उत्कण्ठितं न भविष्यति ।**

**(घ) दया भूतेष्वलोलुप्त्वं मार्दवे हीरचापलम् ।**

**6. अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत- 1x4=4**

(i) यस्याः भर्ता **शक्रसमः** अस्ति ।

(क) शक्रेण समः (ख) शक्राय समः (ग) शक्रे समः (घ) शक्रस्य समः

(ii)कथमस्मान् संन्यासनोऽपि **कठोरभाषणैः** तिरस्करोषि ?

(क)कठोरैः भाषणैः (ख) कठोर भाषणैः (ग) कठोरं भाषणम् इति (घ) कठोरं भाषणम् यस्य सः

(iii)**भोजनान्ते** विषापहम् ।

(क)भोजनस्य अन्ते (ख)भोजनम् अन्ते (ग) भोजनम् नान्ते (घ) भोजनाय अन्ते

(iv) गुणी गुणं वेत्ति न वेत्ति **निर्गुणः**।

(क) गुणेन सहितम् (ख)निर् गुणः इति (ग) गुणानाम् अभावः (घ) गुणानाम् विना

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- 1x4=4**

(i)अपौरूषेयं **<u>श्रुतिः</u>** |

(क)श्रु+क्तिन् (ख) श्रु+ति (ग) श्रुत+इ (घ) श्रु+णिनि

(ii) अहं **<u>बलवान्</u>** सिद्धः सुखी च अस्मि

(क)बल+वान् (ख) बल+आन् (ग)बल+मतुप् (घ) बलवत्+मतुप्

(iii) समीपमागत्य संन्यासिना **<u>उक्तम्</u>** ।

(क) वच्+क्त (ख) उच्+क्त (ग) वक्+क्त (घ) उक्+क्त

(iv) कर्माणि **<u>(आ+रभ्+शानच्)</u>** पुरुषं श्रीः निषेवेते ।

(क) आरभमाणम् (ख) आरभशानच् (ग) आरभाणम् (घ) आरभशान

**8. समुचितं उपपदविभक्तिरूपं चिनुत- 1x4=4**

**(i) आचार्यः..........अनुशास्ति।**

(क) अन्तेवासिना (ख) अन्तेवासिनम् (ग) अन्तेवासिने (घ) अन्तेवासिनः

**(ii) ............ सह सीता वनं गन्तुम् इच्छति।**

(क) रामेण (ख) रामस्य (ग) रामाय (घ) रामम्

**(iii) हा धिक्!...............अविज्ञाय उपालभसे।**

(क) तुभ्य (ख) अस्मान् (ग) अहम् (घ) अस्मभ्यम्

**(iv) न ......... अपि समं गता वसुमती, नूनं त्वया यास्यति।**

(क)एकेन (ख)एकस्य (ग)एकात् (घ)एकम्

9. (अ)वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं लिखत-4x1=4

रामभद्रः भोः नारायण! (i) ........ अधुना कुत्र गम्यते?

नारायणः किं न जानासि त्वम्? सः पठनाय (ii)------------ गच्छति ।

रामभद्रः तेन गृहं पुनः कदा (iii) ............?

नारायण - निश्चयेन अध्ययनं समाप्य एव (iv)---------गृहं प्रत्यागमिष्यति।

मञ्जूषा

| आगमिष्यते, विदेशम्, सः, श्यामेन। |
|---|

अथवा

(आ) वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितानि वाक्यानि लिखत-

(i) किं तेन सः--------------(ज्ञा)?

(ii)------------ (अस्मद्) न जानामि ।

(iii) गुरुः सर्वान्----------- (शिष्य) पाठयति।

(iv) शिष्यैः ध्यानेन------------(पाठ) पठ्यन्ते ।

**खण्ड -घ**

**पठितावबोधनम्**

**10.अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - (5)**

संवृत्ते किञ्चिवन्धकारे भुशुण्डी स्कन्धे निधाय निपुर्णं निरीक्षमाणः, आगत-प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषीत्।

ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत्-"कः कः भोः?" इति। अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्-"क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः? ततो "दौवारिक! शान्तो भव किमिपि व्यर्थं मुमूर्षुरिति बधिर इति च वदसि?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत् किं नाज़ायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रि:पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्यः इति' इत्येवं भाषमाणेन द्वाःस्थेन "क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि' इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवम् अभूदालाप:-

**1. एकपदेन उत्तरत - (केवलप्रश्नद्वयम्) 2 x ½ =1**

(क) दौवारिक: कि शृणोति?

(ख)दौवारिक: भुशुण्डी कुत्र निधाय भ्रमति?

(ग) कः साक्षेपमवोचत्?

**2. पूर्णवाक्येन उत्तरत - (केवलप्रश्नद्वयम्) 2x1=2**

(क) दौवारिक: साक्षेपं किम् अवोचत्?

(ख) संन्यासी केन अनुगम्यमानः आसीत्?

(ग) धृततुम्बीपात्रः कः आसीत्?

**3. (अ) निर्देशानुसारम् उत्तरत -1x2=2**

(क)"भव्यमूर्तिः संन्यासी" अनयोः पदयोः विशेषणपदं किम्?

(ख)"मुमूर्षुः समायाति बधिरः" अत्र क्रियापदं किम्?

अथवा

**. (अ) निर्देशानुसारम् उत्तरत -1x2=2**

(क)"प्रकाशे" इति पदस्य विलोमपदं किम्?

(ख) 'स्वामिवर्याणाम्' इत्यस्य पर्यायपदं किं प्रयुक्तम्?

**11. अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- (5)**

(ग) “प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते।।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ।।"

I एकपदेन उत्तरत-**(केवलप्रश्नद्वयम्)** 2x1=2

(क) आसुराः जनाः कस्य क्षयाय प्रभवन्ति?

(ख) कीदृशाः जनाः प्रवृत्तिं निवृत्तिं च न विदुः?

(ग) उग्रकर्माण: के सन्ति ?

II पूर्णवाक्येन उत्तरत**(केवलप्रश्नद्वयम्)** 2x1=2

(क) कीदृशाः जनाः जगतः क्षयाय प्रभवन्ति ?

(ख) आसुरेषु जनेषु किं किं न विद्यते ?

(ग) आसुराः जनाः किं न विदुः?

**III (अ) निर्देशानुसारम् उत्तरत -1x2=2**

(क) 'दृष्टिम्' इत्यस्य किं विशेषणपदमत्र प्रयुक्तम् ?

(ख) 'विनाशाय' इत्यर्थे किं पदमत्र?

**(आ) निर्देशानुसारम् उत्तरत-**

(क) 'न सत्यं तेषु विद्यते' अत्र क्रियापदं किम् ?

(ख)“अशौचम्” इत्यस्य विलोमपदं अत्र किम् अस्ति ?

**12.अधोलिखितं नाट्यांश पठित्वा तदाधारितान प्रश्नान् संस्कृतेन उत्तरत - (5)**

कुण्डला- जाने तेऽभिरुचिम् अध्ययने अध्यापने च। परं यथा लतेयं सहकारमवलम्वते तथैव नारी जीवनयात्रायां कमपि सहचरम् अपेक्षते यः तस्याः अवलम्बनं स्यात्।

मदालसा- नास्ति मत्कृते आवश्यकता अवलम्बनस्य। स्वयं समर्था जीवनपथे चलितुमहं। न कस्यापि सङ्केतैः नर्तितुं पारयामि।

कुण्डला- नर्तिष्यसि तदा एकाकिनी एव।

(विहस्य) यदि त्वं शीघ्रमेव पतिगृहं गमिष्यसि तदा एकाकिनी भविष्यामि ।

मदालसा- परं एकः उपायः अपि चिन्ततः मया|

कुण्डला- कः उपायः?

मदालसा- सङ्गीतसाहित्यमाध्यमेन ब्रह्मविद्यां सरसां विधाय बहुभ्यः शिशुभ्यः शिक्षणं प्रदास्यामि ।

I एकपदेन उत्तरत-**(केवलप्रश्नद्वयम्)** 1/2x2=1

(i) मदालसा केभ्यः जीवनकलां शिक्षयिष्यति?

(ii) कुण्डला मदालसाया: कि जानाति ?

(iii) का जीवनयात्रायां सहचरम् अपेक्षते ?

II पूर्णवाक्येन उत्तरत- **(केवलप्रश्नद्वयम्)** 2x1=2

(i)कुण्डला (विहस्य) मदालसां किं कथयति?

(ii) नारी किम् अपेक्षते?

(iii) मदालसा केन माध्यमेन शिशुभ्यः शिक्षणं प्रदास्यसि?

III(अ) यथानिर्देशम् उत्तरत- 1x2=2

**(क) अपायः इति पदस्य विलोमपदं किं प्रयुक्तम्?**
**(ख) 'हसित्वा ' इति पदस्य अत्र किं पर्यायपदं प्रयुक्तम्?**

अथवा

(आ)यथानिर्देशम् उत्तरत- 1x2=2

(क) बहुभ्यः शिशुभ्यः  अनयोः पदयोः विशेष्यपदं किम् ?

(ख) प्रदास्यामि इत्यस्य कर्तृपदं अत्र किम् ?

**13.अधोलिखितस्य पद्यस्य भावार्थं मजूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत - (1x3=3)**

**अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः।**

**मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः॥**

भावार्थः-अभिमानम् (i)------------शक्तिः मदतामसीवृत्ति (ii)------------श्रीकृष्णम् (iii)-------    अन्येषां शरीरेषु **द्विष्यन्ति**। ।

| |
|---|
| स्वस्य, , इच्छाम्, संयुक्ता: |

अथवा

**. प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत -**
**(अ) कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ।**

(i) य: मनुष्य: कर्माणि आरभते स: समृद्धिं प्राप्नोति ।

(ii) पुरुष: श्रियं न प्राप्नोप्ति ।

(iii) कर्मणा पुरुष: लक्ष्मीं न  निषेवते।

**(आ) इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।**

i. मम पार्श्वे एतन्मां धनमस्ति अत्याधिकमपि अहं प्राप्स्यामि।

ii. इदं वस्तु मम वर्तते अन्यमपि मम एव स्यात् ।

iii. इदमस्ति इति चिन्तयित्वा कोऽपि सन्तुष्ट: न।

(इ) **दोषेषु यत्न: समुहान्  खलानाम्।**

(i)महतां जनानां दोषषु यत्न: भवति।

(ii)दुष्टजनानां दोषषु एवं यत्न: भवति ।

(iii)दुष्टकार्येषु प्रयत्न: न करणीय:।

**14. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत - 1x3-3**

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।

शूरं कृतज्ञं दृढ़सौहृदञ्च लक्ष्मीः स्वयं याति निवासहेतोः।।

अन्वयः - लक्ष्मीः ......... अदीर्घसूत्रं, ---------- व्यसनेषु असक्तम्,---------- कृतज्ञं दृढ़ सौहृदं च निवासहेतो  स्वयं याति।

| |
|---|
| क्रियाविधिज्ञम्,  उत्साहसम्पन्नम्, शूरम् |

**15. (अ)  क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत- 1/2x4=2**

| **क स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (i) दीर्घप्रयासेन कृतं हि वस्तु | (क) पत्न्याः सहयोगः अनिवार्यः । |
| (ii) लक्षम्याः रक्षार्थम् | (ख) तानि त्वयोपास्यानि । |

(iii) यान्यस्माकं सुचरितानि (ग) स्वाध्यायस्तप आर्जवम्।

(iv) दानं दमश्चयज्ञश्च (घ) निमेषमात्रेण भजेद् विनाशम्।

**( आ.) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चिनुत (केवलं प्रश्नचतुष्टयम्) - ½ x 4=2**

(i) त्यागाय सम्भृतार्थानां सत्याय <u>**मितभाषिणाम्**</u> ।

(ii) संन्यासी <u>**तुरीया**</u> श्रमसेवीति प्रणम्यते।

(iii) निरीक्षते केलिवनं प्रविश्य <u>**क्रमेलकः**</u> कण्टकजालमेव।

(iv) तेज: क्षमा <u>**धृतिः**</u> शौचमद्रोहो नातिमानिता।

**(** v)यस्याः <u>शक्र</u>समो भर्ता मया पुत्रवती च या।

| |
|---|
| इन्द्रः , चतुर्थः, अल्पभाषिणाम्, उष्ट्र:, धैर्यः |

**संस्कृतसाहित्येतिहासपरिचयः**

**16. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत-(केवलं प्रश्नत्रयम् )1x3-3**

(i) " **भोजप्रबन्धः** " अस्याः रचनायाः लेखकः कः?

(ii) "श्रीमद्भगवद्गीता" अस्य रचनायाः लेखकः कः?

(iii) "**आचार्या वेदकुमारी घई** " कं पाठ्यांशं लिखितवती ?

(iv) **दौवारिकस्य निष्ठा** अस्य पाठस्य रचयिता कः?

**17. मञ्जूषात: चित्वा रिक्तस्थानानि पूरयत(केवलं) प्रश्नचतुष्टयम)1x3=3**

(i) ----------------रामायणकथा आधारितं नाटकम् अस्ति ।

(ii) नाटके------------ हास्योत्पादक: पात्रः भवति ।

(iii) ---------------नाटकस्य अन्ते भवति ।

(iv) अभिज्ञानशाकुन्तलम् प्रसिद्धं नाटकं--------- रचना अस्ति ।

| |
|---|
| कालिदासस्य, भरतवाक्यम् , विदूषकः , प्रतिमानाटकं |

**18.समुचितं मेलयत - (केवलं प्रश्नत्रयम) 1x4-4**

| भागः क | भागः ख |
|---|---|
| (i) संस्कृतनाटकानि | (क) दश |
| (ii) रूपकस्य भेदाः | (ख) मालविकाग्निमित्रम् |
| (iii) नाटकस्य प्रारम्भे | (ग) सुखान्तानि |
| (iv) कालिदासस्य प्रसिद्धं नाटकं | (घ) नान्दी |